# Shri Jvalamukhi Sahasranamastotram

# શ્રીજ્વાલામુખીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrIjvAlAmukhIsahasranAmastotram

File name : jvAlAmukhIsahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD, Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : See corresponding nAmAvalI

Source : Bhagavati Stuti Manjari p 212

Latest update : October 11, 2014, July 15, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# શ્રીજ્વાલામુખીસહસ્રનામસ્તોત્રમ્

શ્રીભૈરવ્યુવાચ ।
ભગવન્ સર્વધર્મજ્ઞ દેવાનામભયઙ્કર ।
પુરા મે યત્ ત્વયા પ્રોક્તં વરં કૈલાસસાનુતઃ ॥ ૧॥

કૃપયા પરયા નાથ તં મે દાતું ક્ષમો ભવ ।

શ્રીભૈરવ ઉવાચ ।
સત્યમેતત્ ત્વયા પ્રોક્તં વરં વરય પાર્વતિ ॥ ૨॥

તં પ્રયચ્છામિ સંસિદ્ધ્યૈ મનસા યદભીપ્સિતમ્ ।

શ્રીભૈરવ્યુવાચ ।
જ્વાલામુખ્યાસ્ત્વયા દેવ સહસ્રાણિ ચ તત્ત્વતઃ ॥ ૩॥

પ્રોક્તાનિ બ્રૂહિ મે ભક્ત્યા યદિ મે ત્વત્કૃપા ભવેત્ ।

શ્રીભૈરવ ઉવાચ ।
પ્રવક્ષ્યામિ મહાદેવિ જ્વાલાનામાનિ તત્ત્વતઃ ॥ ૪॥

સહસ્રાણિ કલૌ નૃણાં વરદાનિ યથેપ્સિતમ્ ।
અભક્તાય ન દાતવ્યં દુષ્ટાયાસાધકાય ચ ॥ ૫॥

યા સા જ્વાલામુખી દેવી ત્રૈલોક્યજનની સ્મૃતા ।
તસ્યા નામાનિ વક્ષ્યામિ દુર્લભાનિ જગત્રયે ॥ ૬॥

વિના નિત્યબલિં સ્તોત્રં ન રક્ષ્યં સાધકોત્તમૈઃ ।
દુર્ભિક્ષે શત્રુભીતૌ ચ મારણે સ્તમ્ભને પઠેત્ ॥ ૭॥

સહસ્રાખ્યં સ્તવં દેવ્યાઃ સદ્યઃ સિદ્ધિર્ભવિષ્યતિ ।
વિના ગન્ધાક્ષતૈઃ પુષ્પૈર્ધૂપૈર્દીપૈર્વિના બલિમ્ ॥ ૮॥

ન રક્ષ્યં સાધકેનૈવ દેવીનામસહસ્રકમ્ ।
દત્ત્વા બલિં પઠેદ્દેવ્યા મન્ત્રી નામસહસ્રકમ્ ।

દેવિ સત્યં મયા પ્રોક્તં સિદ્ધિહાનિસ્તતોઽન્યથા ॥ ૯॥

અસ્ય શ્રીજ્વાલામુખીસહસ્રનામસ્તવસ્ય ભૈરવ ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, શ્રીજ્વાલામુખી દેવતા, હ્રીં બીજં, શ્રીં શક્તિઃ,
ૐ કીલકં પાઠે વિનિયોગઃ ।

॥ અઙ્ગન્યાસઃ ॥

ભૈરવઋષયે નમઃ શિરસિ । અનુષ્ટુપ્છન્દસે નમો મુખે ।
શ્રીજ્વાલામુખીદેવતાયૈ નમો હૃદિ ।
હ્રીં બીજાય નમો નાભૌ । શ્રીં શક્તયે  નમો ગુહ્યે ।
ૐ કીલકાય નમઃ પાદયોઃ । વિનિયોગાય નમઃ સર્વાઙ્ગેષુ ।
ૐ હ્યામિતિ ષડ્ દીર્ઘયુક્તમાયયા કરષડઙ્ગાનિ વિધાય ધ્યાયેત્ ॥

॥ ધ્યાનમ્ ॥

ઉદ્યચ્ચન્દ્રમરીચિસન્નિભમુખીમેકાદશારાબ્જગાં
પાશામ્ભોજવરાભયાન્ કરતલૈઃ સમ્બિભ્રતીં સાદરાત્ ।
અગ્નીન્દ્વર્કવિલોચનાં શશિકલાચૂડાં ત્રિવર્ગોજ્જ્વલાં
પ્રેતસ્થાં જ્વલદગ્નિમણ્ડલશિખાં જ્વાલામુખીં નૌમ્યહમ્ ॥

ૐ હ્રીં જ્વાલામુખી જૈત્રી શ્રીઞ્જ્યોત્સ્ના જયદા જયા ।
ઔદુમ્બરા મહાનીલા શુક્લુમા શચી શ્રુતિઃ ॥ ૧॥

સ્મયદા સ્મયહર્ત્રી ચ સ્મરશત્રુપ્રિયઙ્કરી ।
માનદા મોહિની મત્તા માયા બાલા બલન્ધરા ॥ ૨॥

ભગરૂપા ભગાવાસા ભીરુણ્ડા ભયઘાતિની ।
ભીતિર્ભયાનકાસ્યા ચ ભ્રૂઃ સુભ્રૂઃ સુખિની સતી ॥ ૩॥

શૂલિની શૂલહસ્તા ચ શૂલિવામાઙ્ગવાસિની ।
શશાઙ્કજનની શીતા શીતલા શારિકા શિવા ॥ ૪॥

સ્રુચિકા મધુમન્માન્યા ત્રિવર્ગફલદાયિની ।
ત્રેતા ત્રિલોચના દુર્ગા દુર્ગમા દુર્ગતિર્ગતિઃ ॥ ૫॥

પૂતા પ્લુતિર્વિમર્શા ચ સૃષ્ટિકર્ત્રી સુખાવહા ।
સુખદા સર્વમધ્યસ્થા લોકમાતા મહેશ્વરી ॥ ૬॥

લોકેષ્ટા વરદા સ્તુત્યા સ્તુતિર્દ્રુતગતિર્નુતિઃ ।

નયદા નયનેત્રા ચ નવગ્રહનિષેવિતા ॥ ૭॥

અમ્બા વરૂથિની વીરજનની વીરસુન્દરી ।
વીરસૂર્વારુણી વાર્તા વરાઽભયકરા વધૂઃ ॥ ૮॥

વાનીરતલગા વામ્યા વામાચારફલપ્રદા ।
વીરા શૌર્યકરી શાન્તા શાર્દૂલત્વક્ ચ શર્વરી ॥ ૯॥

શલભી શાસ્ત્રમર્યાદા શિવદા શમ્બરાન્તકા ।
શમ્બરારિપ્રિયા શમ્ભુકાન્તા શશિનિભાનના ॥ ૧૦॥

શસ્ત્રાયુધધરા શાન્તિર્જ્યોતિર્દીપ્તિર્જગત્પ્રિયા ।
જગતી જિત્વરા જારી માર્જારી પશુપાલિની (૧૦૦) ॥ ૧૧॥

મેરુમધ્યગતા મૈત્રી મુસલાયુધધારિણી ।
માન્યા મન્ત્રેષ્ટદા માધ્વી માધ્વીરસવિઘૂર્ણિતા ॥ ૧૨॥

મોદકાહારમત્તા ચ મત્તમાતઙ્ગગામિની ।
મહેશ્વરપ્રિયોન્મત્તા દાર્વી દૈત્યવિમર્દિની ॥ ૧૩॥ var મહેશ્વરપ્રિયોન્નત્તા
દેવેષ્ટા સાધકેષ્ટા ચ સાધ્વી સર્વત્રગાઽસમા ।
સન્તાનકતરુશ્છાયાસન્તુષ્ટાઽધ્વશ્રમાપહા ॥ ૧૪॥

શારદા શરદબ્જાક્ષી વરદાબ્જનિભાનના । var વરદાઽબ્જનિભાનના
નમ્રાઙ્ગી કર્કશાઙ્ગી ચ વજ્રાઙ્ગી વજ્રધારિણી ॥ ૧૫॥

વજ્રેષ્ટા વજ્રકઙ્કાલા વાનરીં વાયુવેગિની ।
વરાકી કુલકા કામ્યા કુલેષ્ટા કુલકામિની ॥ ૧૬॥

કુન્તા કામેશ્વરી ક્રૂરા કુલ્યા કામાન્તકારિણી ।
કુન્તી કુન્તધરા કુબ્જા કષ્ટહા વગલામુખી ॥ ૧૭॥

મૃડાની મધુરા મૂકા પ્રમત્તા બૈન્દવેશ્વરી ।
કુમારી કુલજાઽકામા કૂવરી નડકૂબરી ॥ ૧૮॥ var કૂબરી
નગેશ્વરી નગાવાસા નગપુત્રી નગારિહા ।
નાગકન્યા કુહૂઃ કુણ્ઠી કરુણા કૃપયાન્વિતા ॥ ૧૯॥

કકારવર્ણરૂપાઢ્યા હ્રીર્લજ્જા શ્રીઃ શુભાશુભા ।
ખેચરી ખગપત્રી ચ ખગનેત્રા ખગેશ્વરી ॥ ૨૦॥

ખાતા ખનિત્રી ખસ્થા ચ જપ્યા જાપ્યાઽજરા ધુતિઃ ।

જગતી જન્મદા જમ્ભી જમ્બુવૃક્ષતલસ્થિતા ॥ ૨૧॥

જામ્બૂનદપ્રિયા સત્યા સાત્ત્વિકી સત્ત્વવર્જિતામ્ ।
સર્વમાતા સમાલોકા લોકાખ્યાતિર્લયાત્મિકા ॥ ૨૨॥ var લોકા ખ્યાતિર્લયાત્મિકા
લૂતા લતા રતિર્લજ્જા વાજિગા (૨૦૦) વારુણી વશા । var લતારતિર્લજ્જા
કુટિલા કુત્સિતા બ્રાહ્મી બ્રહ્મણિ । બ્રહ્મદાયિની ॥ ૨૩॥

વ્રતેષ્ટા વાજિની વસ્તિર્વામનેત્રા વશઙ્કરી ।
શઙ્કરી શઙ્કરેષ્ટા ચ શશાઙ્કકૃતશેખરા ॥ ૨૪॥

કુમ્ભેશ્વરી કુરુઘ્ની ચ પાણ્ડવેષ્ટા પરાત્પરા ।
મહિષાસુરસંહર્ત્રી માનનીયા મનુપ્રિયા ॥ ૨૫॥

દષિણા દક્ષજા દક્ષા દ્રાક્ષા દૂતી દ્યુતિર્ધરા ।
ધર્મદા ધર્મરાજેષ્ટા ધર્મસ્થા ધર્મપાલિની ॥ ૨૬॥

ધનદા ધનિકા ધર્મ્યા પતાકા પાર્વતી પ્રજા ।
પ્રજાવતી પુરી પ્રજ્ઞા પૂઃ પુત્રી પત્રિવાહિની ॥ ૨૭॥

પત્રિહસ્તા ચ માતઙ્ગી પત્રિકા ચ પતિવ્રતા ।
પુષ્ટિઃ પ્લક્ષા શ્મશાનસ્થા દેવી ધનદસેવિતા ॥ ૨૮॥

દયાવતી દયા દૂરા દૂતા નિકટવાસિની ।
નર્મદાઽનર્મદા નન્દા નાકિની નાકસેવિતા ॥ ૨૯॥

નાસા સઙ્ક્રાન્તિરીડ્યા ચ ભૈરવી ચ્છિન્નમસ્તકા ।
શ્યામા શ્યામામ્બરા પીતા પીતવસ્ત્રા કલાવતી ॥ ૩૦॥

કૌતુકી કૌતુકાચારા કુલધર્મપ્રકાશિની ।
શામ્ભવી ગારુડી વિદ્યા ગરુડાસનસંસ્થિતા ॥ ૩૧॥ var ગારુડીવિદ્યા
વિનતા વૈનતેયેષ્ટા વૈષ્ણવી વિષ્ણુપૂજિતા ।
વાર્તાદા વાલુકા વેત્રી વેત્રહસ્તા વરાઙ્ગના ॥ ૩૨॥

વિવેકલોચના વિજ્ઞા વિશાલા વિમલા હ્યજા ।
વિવેકા પ્રચુરા લુપ્તા નૌર્નારાયણપૂજિતા ॥ ૩૩॥

નારાયણી (૩૦૦) ચ સુમુખી દુર્જયા દુઃખહારિણી ।
દૌર્ભાગ્યહા દુરાચારા દુષ્ટહન્ત્રી ચ દ્વેષિણી ॥ ૩૪॥

વાઙ્મયી ભારતી ભાષા મષી લેખકપૂજિતા ।

લેખપત્રી ચ લોલાક્ષી  લાસ્યા હાસ્યા પ્રિયઙ્કરી ॥ ૩૫॥

પ્રેમદા પ્રણયજ્ઞા ચ પ્રમાણા પ્રત્યયાઙ્કિતા ।
વારાહી કુબ્જિકા કારા કારાબન્ધનમોક્ષદા ॥ ૩૬॥

ઉગ્રા ચોગ્રતરોગ્રેષ્ટા નૃમાન્યા નરસિંહિકા ।
નરનારાયણસ્તુત્યા નરવાહનપૂજિતા ॥ ૩૭॥

નૃમુણ્ડા નૂપુરાઢ્યા ચ નૃમાતા ત્રિપુરેશ્વરી ।
દિવ્યાયુધોગ્રતારા ચ ત્ર્યક્ષા ત્રિપુરમાલિની ॥ ૩૮॥

ત્રિનેત્રા કોટરાક્ષી ચ ષટ્ચક્રસ્થા ક્રીમીશ્વરી ।
ક્રિમિહા ક્રિમિયોનિશ્ચ કલા ચન્દ્રકલા ચમૂઃ ॥ ૩૯॥

ચમામ્બગ ચ ચાર્વઙ્ગી ચઞ્ચલાક્ષી ચ ભદ્રદા ।
ભદ્રકાલી સુભદ્રા ચ ભદ્રાઙ્ગી પ્રેતવાહિની ॥ ૪૦॥

સુષમા સ્ત્રીપ્રિયા કાન્તા કામિની કુટિલાલકા ।
કુશબ્દા કુગતિર્મેધા મધ્યમાઙ્ગા ચ કાશ્યપી ॥ ૪૧॥

દક્ષિણાકાલિકા કાલી કાલભૈરવપૂજિતા ।
ક્લીઙ્કારી કુમતિર્વાણી બાણાસુરનિસૂદિની ॥ ૪૨॥

નિર્મમા નિર્મમેષ્ટા ચ નિરયોનિર્નિરાશ્રયા । var નિરર્યોનિર્નિરાશ્રયા
નિર્વિકારા નિરીહા ચ નિલયા નૃપપુત્રિણી ॥ ૪૩॥

નૃપસેવ્યા વિરિઞ્ચીષ્ટા વિશિષ્ટા વિશ્વમાતૃકા ।
માતૃકાઽર્ણવિલિપ્તાઙ્ગી મધુસ્નાતા મધુદ્રવા ॥ ૪૪॥

શુક્રેષ્ટા શુક્રસન્તુષ્ટા શુક્રસ્નાતા કૃશોદરી ।
વૃષા વૃષ્ટિરનાવૃષ્ટિર્લભ્યા લોભવિવર્જિતા ॥ ૪૫॥

અબ્ધિશ્ચ (૪૦૦) લલના લક્ષ્યા લક્ષ્મી રામા રમા રતિઃ ।
રેવા રમ્ભોર્વશી વશ્યા વાસુકિપ્રિયકારિણી ॥ ૪૬॥

શેષા શેષરતા શ્રેષ્ઠા શેષશાયિનમસ્કૃતા ।
શય્યા શર્વપ્રિયા શસ્તા પ્રશસ્તા શમ્ભુસેવિતા ॥ ૪૭॥

આશુશુક્ષણિનેત્રા ચ ક્ષણદા ક્ષણસેવિતા ।
ક્ષુરિકા કર્ણિકા સત્યા સચરાચરરૂપિણી ॥ ૪૮॥

ચરિત્રી ચ ધરિત્રી ચ દિતિર્દૈત્યેન્દ્રપૂજિતા ।
ગુણિની ગુણરૂપા ચ ત્રિગુણા નિર્ગુણા ઘૃણા ॥ ૪૯॥

ઘોષા ગજાનનેષ્ટા ચ ગજાકારા ગુણિપ્રિયા ।
ગીતા ગીતપ્રિયા તથ્યા પથ્યા ત્રિપુરસુન્દરી ॥ ૫૦॥

પીનસ્તની ચ રમણી રમણીષ્ટા ચ મૈથુની ।
પદ્મા પદ્મધરા વત્સા ધેનુર્મેરુધરા મઘા ॥ ૫૧॥

માલતી મધુરાલાપા માતૃજા માલિની તથા ।
વૈશ્વાનરપ્રિયા વૈદ્યા ચિકિત્સા વૈદ્યપૂજિતા ॥ ૫૨॥

વેદિકા વારપુત્રી ચ વયસ્યા વાગ્ભવી પ્રસૂઃ ।
ક્રીતા પદ્માસના સિદ્ધા સિદ્ધલક્ષ્મીઃ સરસ્વતી ॥ ૫૩॥

સત્ત્વશ્રેષ્ઠા સત્ત્વસંસ્થા સામાન્યા સામવાયિકા ।
સાધકેષ્ટા ચ સત્પત્ની સત્પુત્રી સત્કુલાશ્રયા ॥ ૫૪॥

સમદા પ્રમદા શ્રાન્તા પરલોકગતિઃ શિવા ।
ઘોરરૂપા ઘોરરાવા મુક્તકેશી ચ મુક્તિદા ॥ ૫૫॥

મોક્ષદા બલદા પુષ્ટિર્મુક્તિર્બલિપ્રિયાઽભયા ।
તિલપ્રસૂનનાસા ચ પ્રસૂના કુલશીર્ષિણી ॥ ૫૬॥

પરદ્રોહકરી (૫૦૦) પાન્થા પારાવારસુતા ભગા ।
ભર્ગપ્રિયા ભર્ગશિખા હેલા હૈમવતીશ્વરી ॥ ૫૭॥

હેરુકેષ્ટા વટુસ્થા ચ વટુમાતા વટેશ્વરી ।
નટિની ત્રોટિની ત્રાતા સ્વસા સારવતી સભા ॥ ૫૮॥

સૌભાગ્યા ભાગ્યદા ભાગ્યા ભોગદા ભૂઃ પ્રભાવતી ।
ચન્દ્રિકા કાલહર્ત્રીં ચ જ્યોત્સ્નોલ્કાઽશનિરાહ્નિકા ॥ ૫૯॥

ઐહિકી ચૌષ્મિકી ચોષ્મા ગ્રીષ્માંશુદ્યુતિરૂપિણી ।
ગ્રીવા ગ્રીષ્માનના ગવ્યા કૈલાસાચલવાસિની ॥ ૬૦॥

મલ્લી માર્તણ્ડરૂપા ચ માનહર્ત્રી મનોરમા ।
માનિની માનકર્ત્રી ચ માનસી તાપસી તુટિઃ ॥ ૬૧॥ var ત્રુટિઃ
પયઃસ્થા તુ પરબ્રહ્મસ્તુતા સ્તોત્રપ્રિયા તનુઃ ।
તન્વી તનુતરા સૂક્ષ્મા સ્થૂલા શૂરપ્રિયાઽધમા ॥ ૬૨॥

ઉત્તમા મણિભૂષાઢ્યા મણિમણ્ડપસંસ્થિતા ।
માષા તીક્ષ્ણા ત્રપા ચિન્તા મણ્ડિકા ચર્ચિકા ચલા ॥ ૬૩॥

ચણ્ડી ચુલ્લી ચમત્કારકર્ત્રી હર્ત્રી હરીશ્વરી ।
હરિસેવ્યા કપિશ્રેષ્ઠા ચર્ચિતા ચારુરૂપિણી ॥ ૬૪॥

ચણ્ડીશ્વરી ચણ્ડરૂપા મુણ્ડહસ્તા મનોગતિઃ ।
પોતા પૂતા પવિત્રા ચ મજ્જા મેધ્યા સુગન્ધિની ॥ ૬૫॥

સુગન્ધા પુષ્પિણી પુષ્પા પ્રેરિતા પવનેશ્વરી ।
પ્રીતા ક્રોધાકુલા ન્યસ્તા ન્યક્કારા સુરવાહિની ॥ ૬૬॥

સ્રોતસ્વતી મધુમતી દેવમાતા સુધામ્બરા (૬૦૦) ।
મત્સ્યા મત્સ્યેન્દ્રપીઠસ્થા વીરપાના મદાતુરા ॥ ૬૭॥ var ભત્સ્યા
પૃથિવી તૈજસી તૃપ્તિર્મૂલાધારા પ્રભા પૃથુઃ ।
નાગપાશધરાઽનન્તા પાશહસ્તા પ્રબોધિની ॥ ૬૮॥ var નાગપાશધરાનન્તા
પ્રસાદના કલિઙ્ગાખ્યા મદનાશા મધુદ્રવા ।
મધુવીરા મદાન્ધા ચ પાવની વેદના સ્મૃતિઃ ॥ ૬૯॥

બોધિકા બોધિની પૂષા કાશી વારાણસી ગયા ।
કૌશી ચોજ્જયિની ધારા કાશ્મીરી કુઙ્કુમાકુલા ॥ ૭૦॥

ભૂમિઃ સિન્ધુઃ પ્રભાસા ચ ગઙ્ગા ગોરી શુભાશ્રયા ।
નાનાવિદ્યામયી વેત્રવતી ગોદાવરી ગદા ॥ ૭૧॥

ગદહર્ત્રી ગજારૂઢા ઇન્દ્રાણી કુલકૌલિની ।
કુલાચારા કુરૂપા ચ સુરૂપા રૂપવર્જિતા ॥ ૭૨॥

ચન્દ્રભાગા ચ યમુના યામી યમક્ષયઙ્કરી ।
કામ્ભોજી સરયૂશ્ચિત્રા વિતસ્તૈરાવતી ઝષા ॥ ૭૩॥

ચષિકા પથિકા તન્ત્રી વીણા વેણુઃ પ્રિયંવદા ।
કુણ્ડલિની નિર્વિકલ્પા ગાયત્રી નરકાન્તકા ॥ ૭૪॥

કૃષ્ણા સરસ્વતી તાપી પયોર્ણા શતરુદ્રિકા ।
કાવેરી શતપત્રાભા શતબાહુઃ શતહ્રદા ॥ ૭૫॥

રેવતી રોહિણી ક્ષિપ્યા ક્ષીરપા ક્ષોણી ક્ષમા ક્ષયા । var ક્ષિપ્રા
ક્ષાન્તિર્ભ્રાન્તિર્ગુરુર્ગુર્વી ગરિષ્ઠા ગોકુલા નદી ॥ ૭૬॥

નાદિની કૃષિણી કૃષ્યા સત્કુટી ભૂમિકા (૭૦૦) ભ્રમા ।
વિભ્રાજમાના તીર્થ્યા ચ તીર્થા તીર્થફલપ્રદા ॥ ૭૭॥

તરુણી તામસી પાશા વિપાશા પ્રાશધારિણી ।
પશૂપહારસન્તુષ્ટા કુક્કુટી હંસવાહના ॥ ૭૮॥

મધુરા વિપુલાઽકાઙ્ક્ષા વેદકાણ્ડી વિચિત્રિણી ।
સ્વપ્નાવતી સરિત્ સીતાધારિણી મત્સરી ચ મુત્ ॥ ૭૯॥

શતદ્રૂર્ભારતી કદ્રૂરનન્તાનન્તશાખિની । var કદ્રૂરનન્તાઽનન્તશાખિની
વેદના વાસવી વેશ્યા પૂતના પુષ્પહાસિની ॥ ૮૦॥

ત્રિશક્તિઃ શક્તિરૂપા ચાક્ષરમાતા ક્ષુરી ક્ષુધા ।
મન્દા મન્દાકિની મુદ્રા ભૂતા ભૂતપતિપ્રિયા ॥ ૮૧॥

ભૂતેષ્ટા પઞ્ચભૂતઘ્ની સ્વક્ષા કોમલહાસિની ।
વાસિની કુહિકા લમ્ભા લમ્બકેશી સુકેશિની ॥ ૮૨॥

ઊર્ધ્વકેશી વિશાલાક્ષી ઘોરા પુણ્યપતિપ્રિયા ।
પાંસુલા પાત્રહસ્તા ચ ખર્પરી ખર્પરાયુધા ॥ ૮૩॥

કેકરી કાકિની કુમ્ભી સુફલા કેકરાકૃતિઃ ।
વિફલા વિજયા શ્રીદા શ્રીદસેવ્યા શુભઙ્કરી ॥ ૮૪॥

શૈત્યા શીતાલયા શીધુપાત્રહસ્તા કૃપાવતી ।
કારુણ્યા વિશ્વસારા ચ કરુણા કૃપણા કૃપા ॥ ૮૪॥

પ્રજ્ઞા જ્ઞાના ચ ષડ્વર્ગા ષડાસ્યા ષણ્મુખપ્રિયા ।
ક્રૌઞ્ચી ક્રૌઞ્ચાદ્રિનિલયા દાન્તા દારિદ્ર્યનાશિની ॥ ૮૬॥

શાલા ચાભાસુરા સાધ્યા સાધનીયા ચ સામગા ।
સપ્તસ્વરા સપ્તધરા સપ્તસપ્તિવિલોચના ॥ ૮૭॥

સ્થિતિઃ ક્ષેમઙ્કરી સ્વાહા વાચાલી (૮૦૦) વિવિષામ્બરા ।
કલકણ્ઠી ઘોષધરા સુગ્રીવા કન્ધરા રુચિઃ ॥ ૮૮॥

શુચિસ્મિતા સમુદ્રેષ્ટા શશિની વશિની સુદૃક્ ।
સર્વજ્ઞા સર્વદા શારી સુનાસા સુરકન્યકા ॥ ૮૯॥

સેના સેનાસુતા શ઼ૃઙ્ગી શ઼ૃઙ્ગિણી હાટકેશ્વરી ।
હોટિકા હારિણી લિઙ્ગા ભગલિઙ્ગસ્વરૂપિણી ॥ ૯૦॥

ભગમાતા ચ લિઙ્ગાખ્યા લિઙ્ગપ્રીતિઃ કલિઙ્ગજા ।
કુમારી યુવતી પ્રૌઢા નવોઢા પ્રૌઢરૂપિર્ણા ॥ ૯૧॥

રમ્યા રજોવતી રજ્જુ રજોલી રાજસી ઘટી ।
કૈવર્તી રાક્ષસી રાત્રી રાત્રિઞ્ચરક્ષયઙ્કરી ॥ ૯૨॥

મહોગ્રા મુદિતા ભિલ્લી ભલ્લહસ્તા ભયઙ્કરી ।
તિલાભા દારિકા દ્વાઃસ્થા દ્વારિકા મધ્યદેશગા ॥ ૯૩॥

ચિત્રલેખા વસુમતી સુન્દરાઙ્ગી વસુન્ધરા ।
દેવતા પર્વતસ્થા ચ પરભૂઃ પરમાકૃતિઃ ॥ ૯૪॥

પરમૂર્તિર્મુણ્ડમાલા નાગયજ્ઞોપવીતિની ।
શ્મશાનકાલિકા શ્મશ્રુઃ પ્રલયાત્મા પ્રલોપિની ॥ ૯૫॥

પ્રસ્થસ્થા પ્રસ્થિની પ્રસ્થા ધૂમ્રાર્ચિર્ધૂમ્રરૂપિણી ।
ધૂમ્રાઙ્ગી ધૂમ્રકેશા ચ કપિલા કાલનાશિની ॥ ૯૬॥

કઙ્કાલી કાલરૂપા ચ કાલમાતા મલિમ્લુચી ।
શર્વાણી રુદ્રપત્ની ચ રૌદ્રી રુદ્રસ્વરૂપિણી ॥ ૯૭॥

સન્ધ્યા ત્રિસન્ધ્યા સમ્પૂજ્યા સર્વૈશ્વર્યપ્રદાયિની ।
કુલજા સત્યલોકેશા સત્યવાક્ સત્યવાદિની ॥ ૩૮॥

સત્યસ્વરા સત્યમયી હરિદ્વારા હરિન્મયી ।
હરિદ્રતન્મયી રાશિ (૯૦૦) ર્ગ્રહતારાતિથિતનુઃ ॥ ૯૯॥

તુમ્બુરુસ્ત્રુટિકા ત્રોટી ભુવનેશી ભયાપહા ।
રાજ્ઞી રાજ્યપ્રદા યોગ્યા યોગિની ભુવનેશ્વરી ॥ ૧૦૦॥

તુરી તારા મહાલક્ષ્મીર્ભીડા ભાર્ગી ભયાનકા ।
કાલરાત્રિર્મહારાત્રિર્મહાવિદ્યા શિવાલયા ॥ ૧૦૧॥

શિવાસઙ્ગા શિવસ્થા ચ સમાધિરગ્નિવાહના ।
અગ્નીશ્વરી મહાવ્યાપ્તિર્બલાકા બાલરૂપિણી ॥ ૧૦૨॥ var મહીવ્યાપ્તિ
બટુકેશી વિલાસા ચ સદસત્પુરભૈરવી ।
વિઘ્નહા ખલહા ગાથા કથા કન્થા શુભામ્બરા ॥ ૧૦૩॥

ક્રતુહા ઋતુજા ક્રાન્તા માધવી ચામરાવતી ।

અરુણાક્ષી વિશાલાક્ષી પુણ્યશીલા વિલાસિની ॥ ૧૦૪॥

સુમાતા સ્કન્દમાતા ચ કૃત્તિકા ભરણી બલિઃ ।
જિનેશ્વરી સુકુશલા ગોપી ગોપતિપૂજિતા ॥ ૧૦૫॥

ગુપ્તા ગોપ્યતરા ખ્યાતા પ્રકટા ગોપિતાત્મિકા ।
કુલામ્નાયવતી કીલા પૂર્ણા સ્વર્ણાઙ્ગદોત્સુકા ॥ ૧૦૬॥

ઉત્કણ્ઠા કલકણ્ઠી ચ રક્તપા પાનપાડમલા ।
સમ્પૂર્ણચન્દ્રવદના યશોદા ચ યશસ્વિની ॥ ૧૦૭॥

આનન્દા સુન્દરી સર્વાનન્દા નન્દાત્મજા લયા ।
વિદ્યુત્ ખદ્યોતરૂપા ચ સાદરા જવિકા જવિઃ ॥ ૧૦૮॥ var જીવકા
જનની જનહર્ત્રી ચ ખર્પરા ખઞ્જનેક્ષણા ।
જીર્ણા જીમૂતલક્ષ્યા ચ જટિની જયવર્ધિની ॥ ૧૦૯॥

જલસ્થા ચ જયન્તી ચ જમ્ભારિવરદા તથા ।
સહસ્રનામસમ્પૂર્ણા દેવી જ્વાલામુખી સ્મૃતા (૧૦૦૦) ॥ ૧૧૦॥

ઇતિ નામ્નાં સહસ્રં તુ જ્વાલામુખ્યાઃ શિવોદિતમ્ ।
ચતુર્વર્ગપ્રદં નિત્યં બીજત્રયપ્રકાશિતમ્ ॥ ૧૧૧॥

મોક્ષૈકહેતુમતુલં ભુક્તિમુક્તિપ્રદં નૃણામ્ ।
સ્તુત્યં ચ સાધનીયં ચ સર્વસ્વં સારમુત્તમમ્ ॥ ૧૧૨॥

મહામન્ત્રમયં વિદ્યામયં વિદ્યાપ્રદં પરમ્ ।
પરબ્રહ્મસ્વરૂપં ચ સાક્ષાદમૃતરૂપણમ્ ॥ ૧૧૩॥

અદ્વૈતરૂપણં નામ્નાં સહસ્રં ભૈરવોદિતમ્ ।
યઃ પઠેત્ પાઠયેદ્વાપિ શ ૃણોતિ શ્રાવયેદપિ ॥ ૧૧૪॥

ભક્ત્યા યુતો મહાદેવિ સ ભવેદ્ભૈરવોપમઃ ।
શિવરાત્ર્યાં ચ સઙ્ક્રાન્તૌ ગ્રહણે જન્મવાસરે ॥ ૧૧૫॥

ભૈરવસ્ય બલિં દત્ત્વા મૂલમન્ત્રેણ માન્ત્રિકઃ ।
પઠેન્નામસહસ્રં ચ જ્વાલામુખ્યાઃ સુદુર્લભમ્ ॥ ૧૧૬॥

અનન્તફલદં ગોપ્યં ત્રિસન્ધ્યં યઃ પઠેત્ સુધીઃ ।
અણિમાદિવિભૂતીનામીયરો ધાર્મિકો ભવેત્ ॥ ૧૧૭॥

અર્ધરાત્રે સમુત્થાય શૂન્યગેહે પઠેદિદમ્ ।

નામ્નાં સહસ્રકં દિવ્યં ત્રિવારં સાધકોત્તમઃ ॥ ૧૧૮॥

કર્મણા મનસા વાચા જ્વાલામુખ્યાઃ સુતો ભવેત્ ।
મધ્યાહ્ને પ્રત્યહં ગત્વા પ્રેતભૂમિ વિધાનવિત્ ॥ ૧૧૯॥

નરમાંસવલિં દત્ત્વા પઠેત્ સહસ્રનામકમ્ ।
દિવ્યદેહધરો ભૂત્વા વિચરેદ્ભુવનત્રયમ્ ॥ ૧૨૦॥

શનિવારે કુજેઽષ્ટમ્યાં પઠેન્નામસહસ્રકમ્ ।
દત્ત્વા ક્ષીરબલિં તસ્યૈ કરસ્થાઃ સર્વસિદ્ધયઃ ॥ ૧૨૧॥

વિના નૈવેદ્યમાત્રેણ ન રક્ષ્યં સાધકોત્તમૈઃ ।
કુજવારે સદા દેવિ દત્ત્વાઽઽસવબલિં નરઃ ॥ ૧૨૨॥ var દત્ત્વાસવબલિં
પઠેત્ સાધક એવાશુ લભેદ્ દર્શનમુત્તમમ્ ।
શનિવારે સદા વિદ્યાં જપ્ત્વા દત્ત્વા બલિં પ્રિયે ॥ ૧૨૩॥

કપોતસ્ય મહેશાનિ પઠેન્નામસહસ્રકમ્ ।
તદ્ગૃહે વર્ધતે લક્ષ્મીર્ગોકર્ણમિવ નિત્યશઃ ॥ ૧૨૪॥

શતાવર્તં ચરેદ્રાત્રૌ સાધકો દર્શનં લભેત્ ।
વન્ધ્યા વા કાકવન્ધ્યા વા કુઙ્કુમેન લિખેદિદમ્ ॥ ૧૨૫॥

સ્વસ્તન્યેન ચ શુક્રેણ ભૂર્જે નામસહસ્રકમ્ ।
ગલે વા વામબાહૌ વા ધારયેત્ પ્રત્યહં પ્રિયે ॥ ૧૨૬॥

વન્ધ્યાઽપિ લભતે પુત્રાઞ્શૂરાન્ વિદ્યાધરોપમાન્ । var વન્ધ્યાપિ
ઇદં ધૃત્વા સવ્યબાહૌ ગત્વા રણધરાં પ્રતિ ॥ ૧૨૭॥

નિર્જિત્ય શત્રુસઙ્ઘાતાન્ સુખી યાતિ સ્વકં ગૃહમ્ ।
વારત્રયં પઠેન્નિત્યં શત્રુનાશાય પાર્વતિ ॥ ૧૨૮॥

બારદ્વયં પઠેલ્લક્ષ્મ્યૈ મુક્ત્યૈ તુ શતધા પઠેત્ ।
વશ્યાર્થે દશધા નિત્યં મારણાર્થે ચ વિંશતિમ્ ॥ ૧૨૯॥

સ્તમ્ભનાર્થે પઠેન્નિત્યં સપ્તધા માન્ત્રિકોત્તમઃ ।
ભૂમ્યર્થે ત્રિંશતિં દેવિ પઠેન્નામસહસ્રકમ્ ॥ ૧૩૦॥

પ્રત્યહમેકવારં તુ મૃતો મોક્ષમવાપ્નુયાત્ ।
અપ્રકાશ્યમદાતવ્યમવક્તવ્યમભક્તિષુ ॥ ૧૩૧॥

અશાક્તાયાકુલીનાય કુપુત્રાય દુરાત્મને ।

ગુરુભક્તિવિહીનાય દીક્ષાહીનાય પાર્વતિ ॥ ૧૩૨॥

દત્ત્વા કુષ્ઠી ભવેલ્લોકે પરત્ર નરકં વ્રજેત્ ।
શ્રદ્ધાયુક્તાય ભક્તાય સાધકાય મહાત્મને ।
સાચારાય સુશીલાય દત્ત્વા મોક્ષમવાપ્નુયાત્ ॥ ૧૩૩॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે દશવિદ્યારહસ્યે
શ્રીજ્વાલામુખીસહસ્રનામસ્તોત્રં સમાપ્તમ્ ॥

Proofread by DPD, Pallasena Narayanaswami ppnswami at gmail.com

*Shri Jvalamukhi Sahasranamastotram*
pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*